**VIII सूचनानुसारं लवस्य स्वभावं निरूपयत -** **5**

भवभूतेः उत्तररामचरितम् .................. वाल्मीकेः आश्रमे जन्म .................. द्वादशवर्षीयः चपलबालः .................. वटूनां नेता .................. यागाश्वबन्धनम् .................. धीरः .................. पण्डितः।

**IX खण्डिकां पठित्वा प्रश्नानामुत्तराणि लिखत -** **5**

भारतीयसंस्कृतेः आदर्शभूतः ग्रन्थः भवति श्रीमद्भगवद्गीता। बहुभिः पण्डितैः व्याख्यातः अयं ग्रन्थः महाभारतस्य भीष्मपर्वणि अन्तर्भवति। कुरुक्षेत्रे समरसन्नद्धः अर्जुनः शत्रुपक्षे स्वबान्धवान् दृष्ट्वा चञ्चलमनाः सन् युद्धं न करोमि इत्युक्त्वा रथे उपाविशत्। तदा श्रीकृष्णेन अर्जुनाय दत्तः उपदेशः अष्टादशसु अध्यायेषु सप्तशत श्लोकैः लिखितः भवति।

1. भगवद्गीता कुत्र अन्तर्भवति?
2. इति + उच्यते - इत्युच्यते। एवं चेत् इत्युक्त्वा - .................. + ..................।
3. अर्जुनस्य शत्रुपक्षे के आसन्?
4. भगवत्गीतायां कति अध्यायाः सन्ति?
5. अर्जुनः युद्धं "न करोमि" इत्युक्त्वा रथे उपाविशत् कारणं किम्?

**X प्रादेशिकभाषायां विवर्तयत -** **5**

काशीनगरं पुराणप्रसिद्धं भवति। तत्र विश्वप्रसिद्धं विश्वनाथमन्दिरम् अस्ति। प्रतिदिनं बहवः भारतीयाः वैदेशिकाश्च अत्र विश्वनाथदर्शनाय आगच्छन्ति। केचन गङ्गास्नानाय काशीम् आगच्छन्ति। केचन शिक्षायै अनुसन्धानाय च।